॥ શ્રી વિષ્ણુસ્તુતિઃ ॥

શ્રીમધ્વસંસેવિતપાદપદ્મં
રુદ્રાદિદેવૈઃપરિસેવ્યમાનમ ।
ઋષ્યાદિભિર્વેદપથૈઃ સુગેયં
કથં નુ પશ્યેયમમોઘવીર્યમ ॥ ૧ ॥

હૃન્મંદિરે સુંદરરત્નપીઠે
લક્ષ્મ્યાત્મકે સારતરે નિવિષ્ટમ ।
શ્રીભૂસમાશ્લિષ્ટતનું તથાઽપિ
પૂર્ણં નિજાનંદમયં પરેશમ ॥ ૨ ॥

અનંતપૂર્ણેંદુકિરીટશોભિતં
સુનીલસ્નિગ્ધાલકશોભિસન્મુખમ ।
પ્રત્યગ્રકંજાયતલોલલોચનં
સુચંપકાકોરકનાસિકાયુતમ ॥ ૩ ॥

પ્રવાલમધ્યાર્પિતકુંદકોરકં
સ્ફુરત્કપોલદ્યુતિદીપ્તકુંડલમ ।
કેયૂરભૂષાયુતબાહુદંડકં
સુચક્રશંખાબ્જગદાવિરાજિતમ ॥ ૪ ॥

ગ્રૈવેયરત્નાભરણાદિભૂષિતં

સત્કૌસ્તુભાવેષ્ટિતકંબુકંધરમ ।
સુવર્ણસૂત્રાંચિતસુંદરોરસં
વિચિત્રપીતાંબરધારિણં પ્રભુમ ॥ ૫ ॥

કરિરાજકરોપમોરુયુગ્મં
પ્રિયયા સેવિતજંઘયા સમેતમ ।
વરકૂર્મપ્રપદેન શોભમાનં
હ્યનભિવ્યકતસુગુલ્ફપાદયુગ્મમ ॥ ૬ ॥

નખરાજિસુપૂર્ણચંદ્રકાંત્યા
નુતિમજ્જનતાપહારિણં રમેશમ ।
નિજપૂર્ણસુબોધવિગ્રહં
પરમાનંદપરાત્મદૈવતમ ॥ ૭ ॥

॥ ઈતિ શ્રીવિષ્ણુસ્તુતિઃ ॥